National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 42-44
© 2025 NJHSR
www.sanskritarticle.com

डा. ए .टि . बद्रि
संस्कृत अध्यापकः ,
मधुरान्तकम्

Correspondence:
डा. ए .टि . बद्रि
संस्कृत अध्यापकः ,
मधुरान्तकम्

# शरीरलक्षणम्

डा. ए .टि . बद्रि

विशिष्टाद्वैतवेदान्तमतरीत्या शरीरलक्षणम् पूर्वपक्षसिद्धान्तानुगुणं विव्रीयते।। पूर्वपक्षीनामयमभिप्रायः - चिदचित् वस्तुनः परब्रह्मशरीरत्वं न सम्भवति इति। यतो हि कर्मफलरूपसुखदुःख पञ्चवृत्तिप्राणाधीनधारणत्वम्, भोगसाधनभूत पृथिव्यादिभूतसङ्घात-विशेषत्वं इन्द्रियाश्रयत्वम्, शरीरत्वम् इति लोकवेदयोः शरीरत्वप्रसिद्धिः वर्तते। अतः चिदचिद्वस्तुनः परमात्मशरीरत्वं न सम्भवति इति तेषामभिप्रायः। तथा च परमात्मनश्च अपहतपाप्मा विजरः, अनश्नन् अन्यः इत्यादिभिः अभिचाकशीति, अपाणिपादो जवनो गृहीता, अप्राणो हि अमनाः, कर्मतत्फलभोगयोः अभावात्, इन्द्रियाधीनभोगत्वाभावाच्च न परमात्मानं प्रति चेतनाचेतनयोः शरीरत्वम् इति अभिप्रायः।

किञ्च, सिद्धान्त्यभिमत लक्षणं दूषयति। भोगायतनत्वम् शरीरत्वमिति न शरीरत्वसम्भवः। कुतेति चेत्, भोगायतनेषु वेश्मादिषु शरीरत्वाप्रसिद्धेः। अस्माभिः गृहे स्थित्वा सुखादयः अनुभूयन्ते तमनुभवं प्रति गृहादीनि आयतनानि भवन्ति, तथापि भोगायतनत्वेन विध्यमानस्य गृहादेः शरीरत्वव्यवहारः नास्ति । अतः भोगायतनत्वं शरीरत्वम् इति वक्तुं न शक्यते इति। किञ्च, यत्र वर्त्तमानस्य सुखदुःखोपभोगः तदेव खलु भोगायतनम् इति चेत्, अर्थात् यत्र स्थित्वा, अस्माकं सुखाद्यनुभवः जायते, तदेव शरीरम् इति वक्तव्यम्। तथा च गृहात् बहिः उत यत्रकुत्रापि वा स्थित्वा सुखादयः अनुभूयन्ते इत्यतः यत्र वर्त्तमानस्यैव इति नियमस्य पूर्वोक्त दोषः नायाति। परं परकायप्रवेशे जन्म सुखदुःखोपभोगायतनस्य परकाय प्रविष्टशरीरत्वाप्रसिद्धेः। तथा च स्वतः सिद्धस्य नित्यनिरतिशयानन्दस्य ईश्वरस्य भोगं प्रति चिदचितोः आयतनत्वनियमः न सम्भवति। अनेन भोगसाधनमात्रस्य शरीरत्वम् प्रत्युक्तम् (निराकृतम् इत्यर्थः)। इतः परम् सिद्धान्त्यभिमतलक्षणं दूषयति पूर्वपक्षी। तथा च सिद्धान्तपक्षे इदमपि लक्षणत्वेन उच्यते - यदिच्छाधीन स्वरूपस्थिति प्रवृत्तिः यत्, तत् तस्य शरीरमिति। सर्वस्यापि पदार्थस्य ईश्वरेच्छाधीनस्वरूपस्थिति प्रवृत्तित्वेन ईश्वरशरीरत्वं सम्भवति इति। तदपि न सम्भवति इत्युच्यते। यतो हि शरीरतया, यत्र यत्र प्रसिद्धिः वर्तते, तत्र चेतनेच्छायत्तस्वरूपत्वाभावात्, रूग्णशरीरस्य तदिच्छाधीन प्रवृत्तित्वाभावात्, मृतशरीरस्य तदायत्तस्थितित्वाभावाच्च, यदिच्छाधीनस्वरूपस्थिति प्रवृत्तिः यत्, तत् तस्य शरीरमिति न वक्तव्यम्। एवमेव, सालभञ्जिकादिषु चेतनेच्छाधीनस्वरूप-स्थितिप्रवृत्तिषु सत्सु तच्छरीरत्वाप्रसिद्धेश्च। तथा च नित्यचेतनस्य ईश्वरेच्छा-

यत्तस्वरूपत्वाभावाच्च पूर्वोक्तेषु अतिव्याप्त्यव्याप्त्यसम्भवेति इति दूषणत्रयमपि तच्छरीर-त्वासम्भवः। अतः लक्षणेषु प्रदर्शितम्। यदेकनित्याम्यम्, यदेकधार्यम्, यस्यैकशेषभूतम्, तत् तस्य तदुपरि प्रश्नः- शरीरमिति शरीरलक्षणं वक्तुं शक्यते इति। किन्तु क्रियादिषु व्यभिचारात् पूर्वोक्तं लक्षणं न सम्भवति। आदि शब्देन गुणानामपि स्वीकारः। एवञ्च परमात्मनः अशरीरं शरीरेषु, **अपाणिपादो जवनो गृहीता** इत्यादिभिः श्रुतिभिः शरीराभावः प्रतिपाद्यते।अतः जगद्ब्र-ह्मणोः शरीरशरीरिभावस्य असम्भवात्। तत्सम्भवे च ब्रह्मणि दोषप्रसङ्गात् ब्रह्मकारणवादे वेदान्तवाक्यानां असामञ्जस्यम् इति पूर्वपक्षवादीनाम् अभिप्रायः।

**सिद्धान्तः**

वेदान्तवाक्यानाम् असामञ्जस्यम् नैव भवति। कुतेति चेत्, एकस्यैव अवस्थाद्वयान्वयेऽपि गुणदोषव्यवस्थितेः दृष्टान्तस्य विद्यमानत्वात्। तदर्थं इदं सूत्रम् प्रवृत्तम् न तु दृष्टान्तभावात् इति। शरीरात्मत्वसम्भवात् इत्यर्थः। भवतु भगवतः हेय-सम्बन्धः नास्तीत्यत्र दृष्टान्तः कः इति चेत् उच्यते, चिद-चिद्वस्तुशरीरतया तदात्मभूतस्य परब्रह्मणः सङ्कोचवि-कासा-त्मककार्यकारणभाव अवस्थाद्वयान्वयेऽपि न कश्चित् विरोधः इति। यतो हि, सङ्कोचविकासौ परब्रह्मशरीर-भूतचिद-चिद्वस्तुगतौ। शरीरगताः दोषाः न आत्मनि प्रसज्यन्ते। आत्मगताश्च गुणाः न शरीरे। यथा सशरीराणां देवमनुष्यादीनां क्षेत्रज्ञानां शरीरगताः बालत्व, युवत्व, स्थवरित्वादयः न आत्मनि सम्बन्ध्यन्ते। आत्मगताश्च ज्ञानसुखादयः न शरीरे सम्भवन्ति । तदुपरि प्रश्नः। परब्रह्मणः साक्षात् अवस्थाश्रयत्वं यदि न सम्भवति, तर्हि उपादानत्वं उपादेयत्वञ्च मुख्यं इति न स्वीकुर्मः इति। समाधीयते इत्थम् – देवो जातः, मनुष्यो जातः इति आत्मनि देवत्वमनुष्यत्वादि धर्माः परम्परयाविद्य-मानत्वात्, एवं व्यवहारबलेन कार्यत्वस्य प्रामाणिकत्वेन अङ्गीकृतत्वाच्च तथा, स एव बालो युवा स्थविरश्च इति बालत्व, युवत्वादि शरीरधर्माः मुख्यत्वेन पठितत्वाच्च, उपादानकारणत्वं सूक्ष्मचिदचित् शरीरद्वारा मुख्यमेव इति ।

ब्रह्मणः अपामेव देवत्वादि धर्माः प्रोक्ताः वर्तन्ते इत्यतः क्षेत्रज्ञानां भूतसूक्ष्मशरीरस्यैव तदुपरि प्रश्नः श्रुतौ इति तु पञ्चम्यां आहुतावापः पुरुषवचसो भवन्ति इति देवमनुष्यादि भावः इति तृतीयाध्याये तदन्तरप्रतिपत्यधिकरणे उच्यते। तथा च अयमर्थः:- शरीरसम्बन्धात् प्राक् जीवस्य अचित्शरीर-कत्वाभावात् शरीरद्वारा कारणावस्थाश्रयत्वम् कथम् वक्तुं शक्यते इति। सम्प्राप्य तदुच्यते इत्थम्- क्षेत्रज्ञानां भूतसूक्ष्म-शरीरस्यैव देवमनुष्यादिभावः इति पश्चात् तृतीयाध्याये उच्यते। तथा च. मरणकाले वानमशि सम्पद्यते इत्यादिना, भूतसूक्ष्मैः सह परलोक प्राप्नोत्ययं जीवः इति । ततः इति तु पञ्चम्याम् आहूतावापः पुरुषवसो भवन्ति इत्यनया भुत्या भूतसूक्ष्मैः सहैव जायते इति ज्ञायते। एवमेव जीवस्य प्रलयकाले मरणं इति **सदेव सोम्येदमग्रासीत् एकमेवाद्वितीयम्** परमात्मनि अविभक्तनामरूपवत्वेन तिष्ठति। एवं अचिदवि-शिष्ठान् प्रलये इति अचित् सम्बन्धविशिष्टत्वेन विद्यमानं जीवम् रमणीय चरणाः रमणीयां योनिमापद्येरन् कपुश्चरणाः कपूय योगिमापद्येरन् इति श्रत्या सः सृजति इत्यपि ज्ञायते। अतः भूतसूक्ष्मैः सहैव तिष्ठति अयं जीवः इति। तथा च विशिष्टब्रह्मणः उपादानोपादेयभावस्य आक्षेपः नास्ति इति निश्धीयते ।

यदुक्तं पूर्वपक्षिणा- चिदचिदात्मकस्य जगतः स्थूलस्य सूक्ष्मस्य च परमात्मानं प्रति शरीरभावः नोपपद्यते इति। तदुच्यते तत् अनाकलितसम्यन्यायानुगृहीत वेदान्तवाक्य-गणस्य स्वमतिपरि-कल्पितकुतर्कविजृम्भितम्। सर्व एव हि वेदान्ताः स्थूलस्य सूक्ष्मस्य चेतनस्य अचेतनस्य समस्तस्य च परमात्मानं प्रति शरीरत्वं वदन्ति। वाजसनयिके, अन्तर्यामि-ब्राह्मणे, **यः पृथिव्यां तिष्ठन् ..... यस्य पृथीवी शरीरम्** इत्यारभ्य पृथिव्यादि समस्तं अचिद्वस्तु **यो विज्ञाने तिष्ठन्... यस्य विज्ञानं शरीरम्, यो आत्मनि तिष्ठन्...** यस्यात्मा शरीरम् इत्यनया चेतनं च पृथक् पृथक् निर्दिश्य तस्य तस्य परमात्मशरीरत्वम् अभिधीयते। सुबालोपनिषदि च यः पृथिवीं अन्तरे सञ्चरन् यस्य पृथिवी शरीरम् इत्यारभ्य तद्वदेव चिदचितोः सर्वावस्थयोः परमा-त्मशरीरत्वम् अभिधाय, एष सर्वभूतान्तरात्मा अपहतपा-प्मादिव्यदेव एको नारायणः इति तस्य सर्वभूतानि प्रति आत्मत्वं अभिधीयते । स्मरन्ति च जगत् सर्वं शरीरं ते, यदम्बु वैष्णवः कायः, तत् सर्वं वै हरेस्तनुः, तानि सर्वाणि तद्वपुः, सोऽभिध्याय शरीरात् स्वात् इत्यादिभिः परमात्मशरीरत्वम् जगतः सम्भवति इति ज्ञायते।

तथा च किञ्च लोके शरीरशब्दः घटादिशब्दवत् एकाकारद्रव्येषु मुख्यार्थत्वेन यथा उपयुज्यते, तथा शरीरशब्दः नोपयुज्यते । अपि तु नानाविधाकारवस्तुषु शरीरशब्दः मुख्यार्थत्वेन प्रयुज्यते क्रिमिकीटपतङ्गसर्पपशुनरप्रभृतिषु अत्यन्तविलक्षणाकारेषु द्रव्येषु अगौणः प्रयुज्यमानः दृश्यते। तेन तस्य जीवस्यप्रवृत्तिनिमित्तव्यवस्थापनं सर्वप्रयोगानुगुण्येणैव कार्यमस्ति। पूर्वपक्षिणा यदुक्तं कर्मफल भोगहेतुरित्यादिकं प्रवृत्तिनिमित्तलक्षणं न सर्वप्रयोगानुगुणम् भवति। यतो हि ईश्वरशरीरतमा अभिहितेषु पृथिव्यादिषु अव्याप्तेः सत्वात् । एवमेव, ईश्वरस्य इच्छा विग्रहेषु, मुक्तानां च स एकधा भवति इत्यादिवाक्यावगतेषु विग्रहेषु कर्मफलभोगहेतुत्वाख्यम् लक्षणं अव्याप्तम् कुतः इति चेत् तेषां कर्मफलभेगनिमित्तत्वाभावात् इति। किञ्च, न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः इत्यनया स्मृत्या परमपुरुषेच्छाविग्रहाश्च न पृथिव्यादि भूतसङ्घात-विशेषाः इति ज्ञायते। अतः भूतसङ्घातरूपत्वम् इति यल्लक्षणं उक्तम् पूर्वपक्षिणा तदपि न सम्भवति। पञ्चवृत्ति प्राणाधीनधारणत्वं इति इदं लक्षणं स्थावरशरीरेषु अव्याप्तम्। अतः यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यम्, तच्छेषतैकस्वरूपं च, तत् तस्य शरीरमिति शरीरलक्षणम् सिद्धन्तितम्।।